International Journal of Sanskrit Research 2022; 8(1): 267-270

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 267-270
© 2022 IJSR
www.anantaajournal.com
Received: 03-11-2021
Accepted: 20-12-2021

**ओमप्रकाशपण्डा**
शोधच्छात्रः, साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
राजीवगान्धीपरिसरः, शृङ्गेरी,
कर्नाटक, भारत

**Corresponding Author:**
**ओमप्रकाशपण्डा**
शोधच्छात्रः, साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
राजीवगान्धीपरिसरः, शृङ्गेरी,
कर्नाटक, भारत

# काव्यदोषाः

**ओमप्रकाशपण्डा**

## प्रस्तावना

काव्यरसास्वादयितारः सहृदयाः काव्यानन्दं ब्रह्मानन्दसहोदरत्वेन मन्यन्ते इत्येष सर्वेषां विदितचर एव विचारः । यद्यपि काव्यस्य नैकानि प्रयोजनानि विद्यन्ते, तथापि काव्यानन्दपयोनिधौ निमज्जन्तस्ते सहृदयाः काव्यस्य परमप्रयोजनं साक्षात्कुर्वन्तः रसास्वादनतत्परा एव भवन्ति । यतो ह्यलौकिकोऽयं काव्यानन्दः । तादृशानन्दस्य समुद्भूतिः रसास्वादेनैव भवति, नान्यथा । अत एवोक्तं मम्मटेन 'सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्' इति । परन्तु षड्रसोपेतभोजनरसास्वादने अश्मखण्डा इव ये काव्यरसास्वादस्य विघातकाः भवन्ति त एव काव्यदोषा इतीर्यन्ते काव्यविद्भिः । निर्दुष्टं काव्यं सहृदयानां मनः हरति । अर्थात् काव्यं तदैव मनोहारि भवति यदा रसविघातकदोषेभ्यो विरहितं भवति । तादृशमेव काव्यमुद्दिश्य मम्मटाचार्यैः काव्ये शब्दार्थौ अदोषौ भवेताम् इत्युक्तम् । तर्हि कीदृशमदोषत्वमपेक्षितमिति सन्देह उदेति । तत्परिहारार्थम् आलङ्कारिकैर्निरूपितानां काव्यदोषाणां स्वरूपं स्पष्टतया द्रष्टव्यं भवति ।

काव्ये दोषाणामत्यन्तं हेयत्वं मन्यमानैः कैश्चित् काव्यलक्षणविधायिभिः काव्यलक्षण एव शब्दार्थयोरदोषत्वं निवेशितम् । उदाहरणार्थं-

'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' [1]
'गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ' [2]
'सगुणालङ्कृती काव्यं पदार्थौ दोषवर्जितौ' । [3]

कैश्चिदालङ्कारिकैः एतेषां मतं विरुद्ध्य 'अदोष' इत्येतत्पदं लक्षणे न निवेशनीयम् इति वदन्ति । कविराजविश्वनाथः पण्डितराजजगन्नाथश्च तत्र प्रमुखौ । अस्मिन् विषये एतावदेव वक्तुं शक्यं यत् अदोषशब्दः काव्यलक्षणे निविष्टो भवतु न वा, तस्य (अदोषत्वस्य) काव्ये स्थितिः सर्वैरिष्टैव इति । किमर्थमिति जिज्ञासां परिहर्तुमेव बहुभिः आलङ्कारिकैः दोषस्वरूपं सप्रभेदं स्वग्रन्थेषु निरूपितम् ।

'दुष्यति विकृतं भवत्यनेन' इति व्युत्पत्तौ 'दुष्' धातोः करणे घञ् प्रत्ययेन निष्पन्नो दोषः काव्ये विकारप्रतिपादकः यथा लोके अन्धत्वकाणत्वादयो दोषाः शरीरे तदङ्ग विकारप्रतिपादकास्तथैव काव्येऽपि येन केनापि प्रकारेण शब्देऽर्थे, रसे च ये विकारमुत्पादयन्ति ते दोषा इति कथ्यन्ते ।

दोषनिष्कासनपूर्वकं गुणाधानं लोकरूढिः । अत एव बहुभिरालङ्कारिकैः गुणनिरूपणादपि प्रागेव काव्यदोषस्वरूपं स्वग्रन्थेषु प्रतिपादितम् । दोषलक्षणम् अन्यान्यालङ्कारिकैः अन्यान्यरीत्यैव प्रतिपादितमस्ति । तत्र,

**भरतः**

सर्वप्रथमतया भरतः स्वरचितनाट्यशास्त्रग्रन्थस्य १६ अध्याये दोषानुल्लिखितवान् । तत्र स्पष्टतया दोषस्वरूपं न निरूपितं तेन, किन्तु दोषाणां भावनात्मकस्थितिरेव सङ्केतिता । तस्याभिप्राये गुणाः दोषविपर्यस्ताः- । दोषान्निरूप्य तेनोक्तम्- एते दोषास्तु विज्ञेया एत एव विपर्यस्ताः गुणाः [4] इति ।

**दण्डी**

आचार्यदण्डिनाऽपि दोषाः विपर्ययभावत्वेनैव परिगणिताः । तदभिप्राये गुणाः काव्यस्य सम्पत्तयः अर्थात् औन्दर्यविहायकतत्त्वानि, दोषास्तु तस्य (काव्यस्य) विपत्तिः अर्थात् सौन्दर्यविघातकतत्त्वम्- दोषा विपत्तये तत्र गुणाः सम्पत्तये यथा [5]।

**वामनः**

काव्यशास्त्रस्य प्राचीनाचार्येषु वामनेनैव सर्वप्रथमतया दोषस्य लक्षणं प्रस्तुतम् । किन्तु भरतस्याभिप्रायाद्विपरीतं वर्तते । तदभिप्राये दोषाः गुणविपर्यस्ताः- गुणविपर्ययात्मनो दोषाः [6]।

**अग्निपुराणम्**

अग्निपुराणकारः काव्यास्वादे उद्वेगजनकतत्त्वमेव दोषः- उद्वेगजनको दोषः [7] इति तस्य लक्षणमुक्तवान् ।

**अनन्दवर्धनः**

आचार्यानन्दवर्धनः दोषस्वरूपस्य नूतनप्रणालीं प्रस्तुतवान् । रसस्यापकर्षानपकर्षयो-राधारेणैव तेन दोषाणां नित्यानित्यभेदः प्रतिपादितः –

> श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः ।
> ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः ॥ [8]

तस्याभिप्राये दोषः द्विधा सम्भवति-अशक्तिवशात् अव्युत्पत्तिवशाच्च । तयोः अशक्तिकृतदोषः प्रबलतरः । यतः-

> अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः ।
> यस्त्वशक्तिकृतस्तस्य झटित्येवावभासते ॥ [9]

**मम्मटः**

मुख्यार्थस्य रसस्यापकर्षका दोषाः इति अनेन दोषस्वरूपं प्रतिपादितम्- मुख्यार्थहतिर्दोषः रसश्च मुख्यः [10] इति ।

**विश्वनाथः**

विश्वनाथस्य मतं मम्मटमेवानुसरति । तस्याभिप्रायेऽपि दोषाः रसापकर्षकाः- रसापकर्षका दोषाः [11] ।

अनेन ज्ञायते यत् रससम्प्रदायस्थापनात् प्राक् गुणदोषयोः लक्षणं तयोः परस्परविपर्यस्ततामेवाधारीकृत्य उक्तम् इति । यदा स रससम्प्रदायः सुप्रतिष्ठापितः तदारभ्य रससम्बद्धतय एव तयोः लक्षणं प्रतिपादितम्-रसाभिव्यञ्जकाः रसस्योत्कर्षहेतवश्च गुणाः, रसापकर्षकाः दोषाः इति । अपि च गुणाः नियतरूपेण रसस्योत्कर्षं साधयन्ति, किन्तु दोषाः रसस्यापकर्षं नियतरूपेण कुर्वन्तीति नैव वक्तुं शक्यम्, किन्तु आधिक्येन इति वक्तुं शक्यम् । अनित्यदोषाः कुत्रचित् गुणा अपि भवन्ति, कुत्रचित् अदोषत्वं भजन्ते, कुत्रचित्ताटस्थ्यं वहन्तीत्येतत्तत्र हेतुः । अत एव गुणाः रसस्य नियतधर्माः, दोषास्तु अनित्याः ।

**दोषविभागः**

दोषविभागविषये आलङ्कारिकेषु ऐकमत्यं नास्ति । तदेवं वक्तुं शक्यम्-

**भरतः** दशदोषान् वदति-

> गूढार्थमर्थान्तरमर्थहीनभिन्नार्थमेकार्थमभिप्लुतार्थम् ।
> न्यायादपेतं विषमं विसन्धि शब्दच्युतं वै दश काव्यदोषाः ॥ [12]

अगूढ-अर्थान्तर-अर्थहीन-भिन्नार्थ-एकार्थ-अभिलुप्तार्थ-

न्यायापेत-विषम-विसन्धि-शब्दच्युताः तेनोक्ताः दश दोषाः ।

**भामहः** २५ दोषानङ्गीकरोति । तस्य दोषनिरूपणमेवमस्ति-

> नेयार्थक्लिष्टमन्यार्थमवाचकमयुक्तिमत् ।
> गूढशब्दाभिधानं च कवयो न प्रयुञ्जते ॥ [13]
> हीनताऽसम्भवो लिङ्गवचनभेदो विपर्ययः ।
> उपमानाधिकत्वं च तेनासदृशतापि च ॥[14]
> त एत उपमादोषाः सप्त मेधाविनोदिताः । [15]
> अपार्थव्यर्थमेकार्थससंशयमपक्रमम् ।
> शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसन्धि च ॥
> देशकालकलालोकन्यायागमविरोधि च ।
> प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टं च नेष्यते ॥[16]

**आचार्यः दण्डी** काव्यादर्शग्रन्थस्य तृतीयपरिच्छेदे १० दोषानुल्लिखति –

अपार्थव्यर्थमेकार्थसंशयमपक्रमम् ।
शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसन्धिकम् ॥
देशकालकलालोकन्यायागमविरोधि च ।
इति दोष दशैवैते वर्ज्याः काव्येषु सूरिभिः ॥ [17]

**वामनाचार्यः** काव्यालङ्कारसूत्रवृत्तेः द्वितीयपरिच्छेदे २० दोषान् प्रतिपादयति । तत्र,
पदगतदोषाः- असाधु-कष्ट-ग्राम्य-अप्रतीत-अनर्थकाः ।
पदार्थगतदोषाः- अन्यार्थ-नेयार्थ-गूढार्थ-अश्लील-क्लिष्टाः ।
वाक्यगतदोषाः- भिन्नवृत्त-यतिभ्रष्ट-विसन्धयः ।
वाक्यार्थगतदोषाः- व्यर्थ-एकार्थ-सन्दिग्ध-अप्रयुक्त-अपक्रम-लोकविरुद्ध-विद्याविरुद्धाः । [18]

**आचार्यरुद्रटः** २६ दोषानङ्गीकृतवान् । तेषु,
पददोषाः-असमर्थ-अप्रतीति-विसन्धि-विपरीतकल्पना-ग्राम्यता-अव्युत्पत्ति-देश्याः।
वाक्यदोषाः-सङ्कीर्ण-गर्भित-गतार्थ-अनलङ्कारादयः ।
अर्थदोषाः-अपहेतु-अप्रतीति-निरागम-बाधन-असम्बद्ध-ग्राम्य-विरस-तद्वान-अतिमात्राः । [19]

**आनन्दवर्धनः** ध्वन्यालोकस्य तृतीयोद्योते ६ दोषान् विरोधिनः मन्यते –

विरोधिरससम्बन्धिविभावादिपरिग्रहः ।
विस्तरेणान्वितस्यापि वस्तुनोऽन्यस्य वर्णनम् ॥
अकाण्ड एव विच्छित्तिरकाण्डे च प्रकाशनम् ।
परिपोषं गतस्यापि पौनःपुन्येन दीपनम् ॥
रसस्य स्याद्विरोधाय वृत्त्यनौचित्यमेव च । [20]

**महिमभट्टः** स्वरचिते व्यक्तिविवेके द्वितीयविमर्शे दोषान्निरूपितवान् । अयमाचार्यः दोषशब्दस्थाने अनौचित्यशब्दं प्रयुक्तवान् । तदभिप्राये अनौचित्यम् अन्तरङ्गार्थविषयकबहिरङ्गार्थविषयकभेदेन द्विविधम् । तत्रापि केचन अवान्तरविभागाः तेन कृताः सन्ति ।

**भोजराजः** पदेषु १६, वाक्येषु १६, वाक्यार्थेषु च १६ दोषान् पृथक् पृथगेव स्वीकृतवान् [21]।

**आचार्यः मम्मटः** पद-पदांश-वाक्य-अर्थ-रसभेदेन पञ्चविधदोषान् प्रतिपाद्य तेषु अनेकान् दोषान् अन्तर्भावितवान् [22]।
कविराजविश्वनाथस्य काव्यदोषविवेचनमपि मम्मटमनुसृत्यैव विद्यते [23]।

अनेन विवेचनेन स्पष्टं भवति यत् आचार्यभरतादारभ्य विश्वनाथपर्यन्तम् अनेके काव्यशास्त्रकाराः दोषविवेचनं कृतवन्तः । किन्तु सर्वप्रथमं सन्तुलितं विवेचनं मम्मटाचार्यस्यैव । विश्वनाथः तमेवानुसृत्य दोषान् विवेचितवान् । एताभ्यामाचार्याभ्यां विवेचितेषु दोषेषु अन्यैराचार्यैः विवेचितानां समेषामपि दोषाणां समावेशः भवति ।

## दोषाणां हेयता

भामहाचार्यस्याभिप्राये एकं पदमपि दुष्टं न भवेत् काव्ये । यदि भवति तर्हि दुष्टपुत्रेण पिता इव तत्काव्यं निन्द्यते । दोषयुक्तकाव्यं कुकाव्यं, तत्कर्ता कुकविः । यदि कवित्वं नास्ति तर्हि न कापि हानिः, किन्तु कुकवित्वं साक्षात् मरणसमानमिति सः स्पष्टतया वदति –

सर्वथा पदमप्येकं न निगद्यमवद्यवत् ।
विलक्ष्मणा हि काव्येन दुःसुतेनेव निन्द्यते ॥
नाकवित्वमधर्माय व्याधये दण्डनाय वा ।
कुकवित्वं पुनः साक्षान्मृतिमाहुर्मनीषिणः ॥ [24]

आचार्यदण्डिनः मतानुसारं दोषशून्यं गुणानुरक्तं च काव्यं कामधेनुसमानम् । किन्तु दोषयुक्तकाव्यं तत्कर्तुः मूर्खतायाः द्योतकम् । काव्ये एकं लघु दोषोऽपि न उपेक्ष्यः । यतः सुन्दरं शरीरमपि एकेन चिह्नेन कुरूपं भवति-

गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुर्नैव शंसति ॥
तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन ।
स्याद्वपुः सुन्दरमपि स्वित्रेणैकेन दुर्भगम् ॥ [25]

येन केनापि प्रकारेण रसविघातका एव दोषा, ते च काव्ये अत्यन्तमेव हेयाः भवन्ति इति सर्वेषामप्यालङ्कारिकाणां मतम् । ते दोषाः काव्यशरीरभूतयोः शब्दार्थयोर्द्वारा रसस्यापकर्षं साधयन्ति । अथवा साक्षाद्रसमेव प्रविश्यापि तद्विघातकत्वेन कार्यं कुर्वन्ति । एते दोषाः, रसास्वादेऽवरोधकारित्वेन, आस्वादे विलम्बकारित्वेन, आस्वादस्य विध्वंसकारित्वेन च रसविघातका भवन्ति काव्ये । अतः काव्येषु सर्वथा हेया एवैते वर्तन्ते ।

## संदर्भ सूची

1. मम्मटाचार्यः
2. विद्यानाथः
3. धर्मसूरिः
4. नाट्यशास्त्रम्-१९/९५
5. काव्यादर्श-३/१२४

6. काव्यालङ्कारसूत्रवृत्ति-२/१/१
7. अग्निपुराणम्
8. ध्वन्यालोक-२/११
9. ध्वन्यालोक-तृतीयोद्योतः
10. काव्यप्रकाश-७/१
11. साहित्यदर्पणम्-७/१
12. नाट्यशास्त्रम्-१६/८८
13. काव्यालङ्कार-१/९, १०
14. काव्यालङ्कार-२/३९
15. काव्यालङ्कार-२/४०
16. काव्यालङ्कार-४/१२
17. काव्यादर्श-३/१२५, १२६
18. काव्यालङ्कारसूत्रवृत्ति-२/१/२
19. रुद्रट-काव्यालङ्कार-६/२, ४०. ११/२, २/८
20. ध्वन्यालोक-३/१८, १९
21. सरस्वतीकण्ठाभरणम्-१/३, १/४४, ४५, १/१८, १९
22. काव्यप्रकाशः-७/५०, ५१, ५२, ५३, ५४, ५५, ५६, ५७, ६०, ६१, ६२.
23. साहित्यदर्पणः-७/१, २, ३, ४, ५, ६, ७, ८, ९, १०, ११, १२, १३, १४.
24. काव्यालङ्कार-१/११, १२
25. काव्यादर्श-१/६, ७